International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 148-151
© 2024 IJSR
www.anantaajournal.com
Received: 06-03-2024
Accepted: 10-04-2024

**Deepak Sahu**
Guest Lecturer, School of Sanskrit, Gangadhar Meher University, Amruta Vihar, Sambalpur, Odisha, India

**Corresponding Author:**
**Deepak Sahu**
Guest Lecturer, School of Sanskrit, Gangadhar Meher University, Amruta Vihar, Sambalpur, Odisha, India

# मानवजीवने शिक्षाशास्त्रेषु वर्णितसुभाषितानां प्रासङ्गिकता

**Deepak Sahu**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3c.2381


## सारांश

सांसारिक-आधिभौतिकादित्रितापैः सन्तापितस्य जन्म-जरा-व्याधिग्रस्थस्य मानवस्य कृते वेदः भवति संसार-सन्तरणे तरणी स्वरुपा । वेदपठनेन जनः पुरुषार्थचतुष्ठयस्य प्राप्तिं करोति । वेदः यदि पुरुषः भवेत्, तर्हि तस्य वेदपुरुषस्य घ्राणं भवति शिक्षा । अतः उच्यते-शिक्षा घ्राणं तु वेदस्य ।[1] षड् वेदाङ्गेषु शिक्षा अन्यतमा । ऋग्वेदभाष्यभूमिकायां शिक्षायाः लक्षणविषये एवमुच्यते- स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते, सा शिक्षा ।[2] अर्थात् यस्मिन् शास्त्रे अकार-ककारादिवर्णानां, उदात्तादिस्वराणां, ह्रस्वदीर्घादिमात्राणां, स्थानप्रयत्नादिवलानां, माधुर्यादिगुणानां, गीत्यादिदोषाणां, वर्णागमलोपादिसन्तानानां च वर्णना विद्यते, तत् शास्त्रं शिक्षाशास्त्रमित्युच्यते । यतोहि साम्प्रतिकयुगे मानवाः प्रायतः नीतिहीनाः भवन्ति, तस्मात् हेतोः पथभ्रष्टानां मानवानां दिग्दर्शनाय शिक्षाग्रन्थेषु स्थितानां नीतिश्लोकानां प्रासङ्गिकता विषये शोधपत्रेऽस्मिन् मया आलोच्यते ।


**कूटशब्दः** शिक्षा, वर्णः, स्वरः, मात्रा, वलः, सामः, सन्तानः, ह्रस्वः, दीर्घः, प्लुतः, उदात्तः, अनुदात्तः, स्वरितः, स्थानम्, करणम्, प्रयत्नश्च

## प्रस्तावना

प्रजापतिब्रह्मणः कृतिः अतीव विचित्रा । संसारेऽस्मिन् विद्यमानेषु जीवेषु मानवः श्रेष्ठतमजीवः इति स्वीक्रियते । अपि च एकमात्रं मानवः हि वैखरीवाचा भाषितुं समर्थः भवति । तथा चोक्तं महाभाष्यकारेण- तुरीयं वाचं मनुष्याः वदन्ति । अस्यां वाचि यदि मधुरताम् आगच्छति, तर्हि सर्वेषां मनसि महान् आनन्दः जायते । श्रुतिमधुरः शब्दः सर्वेभ्यः रोचते ।

---

[1] पाणिनीयशिक्षा श्लोक. ४२

[2] द्र. ऋग्वेदभाष्यभूमिका पृ. १८

वक्ता स्वस्य सुमधुरवाण्यां स्वाभीष्टं परिपूरयितुमपि समर्थः भवति। तथा हि- एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति ।[3] यथा वर्णानां सस्वरं सम्यगुच्चारणेन वक्तुः अभीष्टसिद्धिः भवति, तथैव वर्णानां सम्यगुच्चारणाभावे वक्तुरनिष्टमपि भविष्यति । तथा चोक्तं पाणिनीयशिक्षायाम्---

मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हीनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।[4]

अपि च गीतायामुच्यते- आत्मनः बन्धुरात्मैव, आत्मनः रिपुरात्मैव ।[5] अर्थात्, मानवः स्वस्य मधुरभाषणेन सर्वेषां मित्रं भवितुमर्हति, स्वस्य कटुभाषणेन सर्वेषां शत्रुरपि भवति । अतः शिक्षाग्रन्थेषु वर्णितानां नीतिश्लोकानां पठनेन साकं वर्णानामुच्चारणं कथं करणीयम्, तेषां सम्यग् निर्देशः प्रदीयते । अतः साम्प्रतिकमानवानां कृते शिक्षाग्रन्थानां प्रासङ्गिकता अनस्वीकार्यमेव ।

शिक्षाग्रन्थेषु पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, माण्डव्यशिक्षा, माध्यन्दिनीशिक्षा, वर्णरत्नप्रदीपिकाशिक्षा, केशवीशिक्षा, नारदीयशिक्षा, माण्डुकीशिक्षा, मल्लशर्मशिक्षा, स्वराङ्कुशिक्षा, षोडशश्लोकीशिक्षा, अवसाननिर्णयशिक्षा, स्वरभक्तिलक्षणशिक्षा, पारतिशाख्यप्रदीपशिक्षा, क्रमसन्धानशिक्षा, गलदृग्शिक्षा, मनःस्वारशिक्षा प्रभुतयः प्रमुखाः भवन्ति । एते शिक्षाग्रन्थाः संस्कृतवर्ण-स्वर-मात्रा-बल-सन्तानादिविषयेषु सम्यगुपदिश्य वैदिकसंस्कृतभाषायाः लौकिकसंस्कृतभाषायाश्च माधुर्यं द्विगुणितं कुर्वन्ति । एतेषु शिक्षाग्रन्थेषु यद्यपि पाणिनिप्रणीता पाणिनीयशिक्षा सर्वोत्कृष्टं सुप्रसिद्धञ्च वर्त्तते, परन्तु अन्यशिक्षाग्रन्थानामपि अवदानमनस्वीकार्यम् ।

पाणिनीयशिक्षायाम् मन्त्रः केन प्रकारेण उच्चारणीयः इति निर्देशच्छलेन केन प्रकारेण वक्ता पाठकः वा शब्दान् उच्चारयेत् तस्मिन् विषये निम्नोक्तकारिकायामेवमुच्यते—

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः ।।[6]

अर्थात्, उत्तमपाठकस्य समीपे षड् गुणाः स्युः । १. माधुर्यम्, २. अक्षरव्यक्तिः, ३. पदच्छेदः, ४. सुस्वरः, ५. धैर्यम्, ६. लयम् ।

एवंरूपेण पाणिनीयशिक्षायाम् बहुषु कारिकासु शब्दानां सम्यगुच्चारणविधिं प्रदश्र्य संस्कृतभाषायाः प्रकृतमाधुर्यं वितनोति। वैदिककालादारभ्य मानवस्य विजयगाथां सर्वत्रमेव श्रुयते । सभ्यतासम्पन्नमानवः सर्वदा एव अग्रे गन्तुमिच्छति, यतः इदानिन्तनविश्व: विज्ञानस्य युगः इति प्रोच्यते । साम्प्रतिकसमाज: वहुविधेन विकशितं भवति । परन्तु नैतिकगुणस्याभावः प्रायत: दृश्यते । अतः मानवानां समृध्यर्थ सुसमाजस्य गठनार्थ च वेदस्याङ्गः शिक्षाशास्त्रस्य महत्वमनस्वीकार्यमेव । शिक्षाशास्त्रे स्वरवर्णादि तत्वानामतिरिक्तं सुभाषितानामपि वर्णितानि सन्ति । एतानि सुभाषितानि साम्प्रतिकपथभ्रष्टानां जनानां कृते पथप्रदर्शनाय अतीव महत्वपूर्णाः भवन्ति । साम्प्रतिकसमाजे जना: यद्यपि ज्ञानेन समुन्नतिः कुर्वन्ति, तथापि तेषां मानवीयमूल्यवोधं प्रति व्यक्तेः व्यक्तित्वं विषये नैतिकमूल्यवोधं विषये च अधिकं प्रयत्नशीला: भवितुं न अर्हन्ति । शिक्षाग्रन्थाः सततं जनस्य हिताय कर्तव्यनिष्ठो करणाय च सुभाषितानि अपि वर्णयन्ति । प्रथमतया विद्याप्राप्त्यर्थे सुखस्य परिहार: अपरिहार्यमिति याज्ञवल्क्यशिक्षायामुक्तम् सुखप्राप्त्यर्थञ्च विद्याग्रहणात् विरामः इति उच्यते । तथा हि

सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखिनस्तु कुतो विद्या विद्यर्थिनि कुतो सुखम् ।।[7]

[3] द्र. महाभाष्यम् पस्पषाह्निकम्

[4] पाणिनीयशिक्षा श्लोक-५२

[5] श्रीमद्भगवद्गीता ६.५

[6] पाणिनीयशिक्षा-श्लो. ३३

[7] याज्ञवल्क्यशिक्षा-श्लो.२.५.१०२

सांसारिक-नरः जलप्राप्त्यर्थं येन प्रकारेण खनित्रस्यावश्यकं करोति तथैव विद्याप्राप्त्यर्थं अर्थात् गुरोः सेवया विद्यासारल्येन प्राप्यते इति वर्णितम् । अतः गुरोः सेवा अपरिहार्यमेव । तथा हि-

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्या शुश्रुषुरधिगच्छति ।।[8]

गुरोः सेवा विना योऽपि विद्याग्रहणं करोति तदेव निष्फलं भवतीति अस्मिन् ग्रन्थे उक्तमस्ति । यथा-

शुश्रुषारहिताविद्या अपि मेधागुणैयुता ।
वध्यैव युवती तस्य न विद्या फलिनी भवेत् ।।[9]

माण्डुकीयशिक्षायां विद्याप्राप्तेः षड् उपायाः वर्णितानि । ते उपायाः भवन्ति गुरोः सेवा, योगः, तपस्या, प्राज्ञजनस्य सेवा, विगृह्यकथनम्, निरन्तरमभ्यासश्च। उक्तञ्च माण्डुकीयशिक्षायाम् आचार्यमण्डुकेन-

आचार्योपासनाद् योगात् तपस्या प्राज्ञसेवनात् ।
विगृह्यकथनात् कामात् षड्भिर्विद्या प्रपद्यते ।।[10]

विद्या हानेः षड् उपायाः अपि अस्मिन् ग्रन्थे वर्णितानि सन्ति, येन मानवः विद्यया वञ्चितो भवति । ते षड् उपायाः भवन्ति आलस्यः, मुर्खसंयोगः, भयः, रोगः, अत्याशक्तिः, अभिमानञ्च । परन्तु नारदीयशिक्षायाम् एते विद्याप्राप्तेः विघ्नत्वेन तत्र द्युतं, पुस्तकवाचं, नाटकदरशनम्, स्त्रीजनः, तना, निद्रा च षड् संख्यकाः विघ्नाः विषये वर्ण्यन्ते । उक्तञ्च नारदीयशिक्षायाः वर्णनावसरे आचार्यः शोभाकरभट्टेन-

द्युतं पुस्तकवाच्यं च नाटकेषु च सक्तिका ।
स्त्रीयस् तना च निद्रा च विद्याविघ्नकराणि षट् ।।[11]

विद्यार्थी सर्वदा सर्वथा च हंसगरुडवत् गच्छेदीति ग्रन्थेऽस्मिन् वर्णितम् । सः भोजनकाले विलम्वी न भवेत्,नारीवन्धनेऽपि न स्यादीति ।

पुनश्च मानवस्य धारणशक्तिः वुद्धिशक्तिश्च उभयोः प्रशंसायां मण्डुकेन स्वग्रन्थे कथ्यते यत् मुर्खजनः सहस्रपदेनापि एकपदं गन्तुं समर्थो न भवति । परन्तु विद्वान्जनः स्वविद्यया पदमात्रेण शिक्षया शतपदं गन्तुं समर्थो भवति । उक्तं च तेन-

पदेनैकेन मेधावी पदानां चिन्दते शतम् ।
मुर्खः पदसहस्रेण पदमेकं न विन्दति ।।[12]

विद्याहीनो विप्राः गर्धभः इव केवलं वेदवाक्यानां शव्दानां च वहनं कुर्वन्ति । परन्तु तस्य महनीय तत्वं विषये न जानन्ति । येन प्रकारेण गर्धभः चन्दनस्य भार वहति तस्य भारस्य च ज्ञानं करोति अपितु महनीयबिषये न जानाति तथैव ज्ञानहीनजनः कोऽपि न जानाति । उक्तं च पाराशरेण-

यथा खरश्चन्दन भारवाही भारस्य वेत्ता न तु चन्दनस्य
तथा हि विप्राः स्मृतिवेदपूर्णा ज्ञानेन हीनाः खरवद् वहन्ति ।।[13]

पाराशरीशिक्षाग्रन्थे आहारः, निद्रा, भयः, मैथुनं च एते चत्वारः पशुः नरश्च उभयोर्मध्ये ज्ञानमेव भिन्नत्वं प्रकाशति इति वर्णितम् । परन्तु पशुः ज्ञानेन नरेषु पृथक् इति ज्ञायते, अतः ज्ञानस्यापि महिमागीयतेऽत्र । उक्तं च पाराशरेण-

आहार निद्रा भयमैथुनञ्च समानमेतत् पशुभिर्नराणाम् ।
ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिः
समानाः।।[14]

भर्तृहरिणापि नितीशतके श्लोकऽयमुद्धारं क्रियते । अत्र वेदज्ञानं शुद्धः श्वेतवर्णश्च इति वर्ण्यते । विद्याग्रहणे धैर्यस्य आवश्यकता

[8] तत्रैव २.५.११०

[9] नारदीयशिक्षा श्लो.२.८.२८, याज्ञवल्क्यशिक्षा श्लो.२.५.१११

[10] माण्डुकीयशिक्षा श्लो. १७७

[11] नारदीयशिक्षा श्लो. २.८.३०

[12] माण्डुकीयशिक्षा श्लो. १७२

[13] पाराशरीशिक्षा श्लो.१५०, सुश्रुतसंहिता १.४.४

[14] तत्रैव

विद्यते । नरः शनैः शनैः गच्छेत् चेत् विद्याप्राप्तिः भविष्यतीति सन्देह नास्ति । येन वहुदूरं गत्वा वहवः विद्या ग्रहणं करिष्यति । विषयेऽस्मिन् नारदीयशिक्षायाः उक्तिः ग्रहणीयमेव । यथा-

शनैर्विद्या शनैरर्थानारोहेत् पर्वतं शनैः ।
शनैरध्वसु वर्तते योजनानां परं व्रजेत् ।।[15]

## उपसंहार

एतानि सुभाषितानि साम्प्रतिकव्यस्तवहुलं मानवानां कृते अत्यावश्यकमेव । सम्प्रति जनाः केवलम् अर्थस्य पश्चात् धावन्ति येन ते स्वजीवने विद्यायाः कियद् मूल्यमस्ति न पश्यन्ति । नीतिहीना: त्वात् गुरुवरेभ्यः कृते अस्माकं कर्तव्यं किं भवेत् तेषां प्रति अस्माकं किं कर्तव्यं भवेत् ध्यानं स्यात् । यतः गुरुः एव सांसारिकजीवनचक्रस्य पथद्रष्टा जीवनस्य मार्गदर्शकश्च । अतः वयं सर्वे एतानि सुभाषितानि हृदिध्याय उत्तमविचारं कुर्यात् । अनेन समाजस्य उन्नतिः व्यक्तेः ख्यातिश्च भविष्यति एव ।

## सहायकग्रन्थसूची

1. चौवे, व्रजबिहारी, ऋग्वेदप्रातिशाख्यम्, भारतीयविद्याप्रकाशनम्, दिल्ली, २००९
2. तिवारी, हरिनारायणः, शिक्षासंग्रहः, चौखम्वा-संस्कृत-सीरीज्-अफिस्, चौखम्वा, वाराणसी, प्र.सं २०२०
3. पाण्डेयः, रामअवधः, ऋग्वेदभूमिका-भाष्य-, मोतिलाल्बनारसीदास्, दिल्ली, २०११ ।
4. मिश्रः, नारायणः, पाणिनीयशिक्षा, चौखम्बापब्लिशार्स, वाराणसी, २००५
5. मीमांसकः, युधिष्ठिरः, शिक्षा-सूत्राणि, भारतीय-प्राच्यविद्या-प्रतिष्ठानम्, अलवर्-गेट्, अजमेरम्,सं.२०२४

[15] नारदीयशिक्षा २.८.१५